[१०] श्रीपर देवी-सूक्त

'कौल-कल्पतरु' **पण्डित देवीदत्त शुक्ल** जी द्वारा संग्रहीत एक प्राचीन पाण्डुलिपि के आधार पर प्रस्तुत **'सूक्त'** नियमित रूप से सभक्ति **प्रति-दिन पाठ** करने से सभी सिद्धियाँ प्राप्त होती हैं और जीवन के सभी सङ्घर्षों में विजय होती है।

विनियोग—**ॐ अस्य श्रीपर-देवी-सूक्त-माला-मन्त्रस्य मार्कण्डेय-मेधा-ऋषी। गायत्र्यादि-नाना-विधानि छन्दांसि। त्रि-शक्ति-रूपिणी चण्डिका देवता। ऐं बीजं। ह्रीं शक्तिः। क्लीं कीलकं। मम चिन्तित-सकल-मनोरथ-सिद्ध्यर्थे जपे विनियोगः।**

ऋष्यादि-न्यास—**मार्कण्डेय-मेधा-ऋषिभ्यां नमः शिरसि। गायत्र्यादि-नाना-विध-छन्दोभ्यो नमः मुखे। त्रि-शक्ति-रूपिणी-चण्डिका-देवतायै नमः हृदये। ऐं-वीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः। क्लीं-कीलकाय नमः नाभौ (सर्वाङ्गे वा)। मम चिन्तित-सकल-मनोरथ-सिद्ध्यर्थे विनियोगाय नमः।**

कर-न्यास—**ॐ ऐं अंगुष्ठाभ्यां नमः। ॐ ह्रीं तर्जनीभ्यां स्वाहा। ॐ क्लीं मध्यमाभ्यां वषट्। ॐ ऐं अनामिकाभ्यां हुं। ॐ ह्रीं कनिष्ठिकाभ्यां वौषट्। ॐ क्लीं कर-तल-कर-पृष्ठाभ्यां फट्।**

अङ्ग-न्यास— **ॐ ऐं हृदयाय नमः। ॐ ह्रीं शिरसे स्वाहा। ॐ क्लीं शिखायै वषट्। ॐ ऐं कवचाय हुँ। ॐ ह्रीं नेत्र-त्रयाय वौषट्। ॐ क्लीं अस्त्राय फट्।**

दिग्-बन्धन— 'ऐं ह्रीं क्लीं' से छोटिका-मुद्रा द्वारा।

**ध्यान— ॐ योऽग्न्याद्यामर - कार्य - निर्गत-महत् - तेजः समुत्पद्यते।
भास्वत्-पूर्ण-शशाङ्क-चारु-वदना नीलोल्लसद्-भ्रू-लताम्।।
गौरी-तुङ्ग-कुच-द्वया तदुपरि स्फूर्जत् - प्रभा - मण्डलम्।
बन्धूकारुण - काय - कान्तिरतिभिः श्रीचण्डिकामाश्रये।।**

मानसोपचार-पूजन—**श्रीत्रि-शक्ति-रूपिणी-चण्डिका-देवतायै ॐ लं पृथ्वी-तत्त्वात्मकं गन्धं समर्पयामि नमः। हं आकाश-तत्त्वात्मकं पुष्पं समर्पयामि नमः। ॐ यं वायु-तत्त्वात्मकं धूपं घ्रापयामि नमः। ॐ रं अग्नि-तत्त्वात्मकं दीपं दर्शयामि नमः। ॐ वं जल-तत्त्वात्मकं नैवेद्यं निवेदयामि नमः। ॐ सं सर्व-तत्त्वात्मकं ताम्बूलं समर्पयामि नमः।**

ऐं ह्रीं क्लीं चामुण्डायै विच्चे। जय-जय महा-लक्ष्मि जगदानन्द-वीजे सुरासुर-त्रिभुवन-निदाने दयांकुरे सर्व-देव-तेजो-रूपिणि महा-महा-महिमे महा-महा-मय-स्वरूपिणि विरञ्चीशतः सुर-वरदे चिदानन्दे विष्णु-देहावृते महाऽमृत-मोहिनि।।१।।

मधु-कैटभ-विध्वंसिनि सत्वर-दाने-तत्परे महा-सुधाब्धि-वासिनि महा-महि-तेजाऽवधारिणि सर्वाधारे सर्व-कार्य-कारणेऽचिन्त्य-रूपे इन्द्रादि-निखिल-निर्जर-सेविते साम-गायन-गायिनि

पूर्णोदया-कारिणि विजये जयन्त्यपराजिते। रक्तांशुके सूर्य-कोटि-सङ्काशे चन्द्र-कोटि-सुशीतले।।२।।

अग्नि-कोटि-दहन-शीले यम-कोटि-क्रूरे ॐ कार-नाद-बिन्दु-रूपे निगमागम-मार्ग-दायिनि महिषासुर-निर्दलिनि धूम्र-लोचन-वध-परायणे चण्ड-मुण्डादि-शिर-छेदिनि रक्त-वीजादि-रुधिर-शोषिणि रक्त-पान-प्रिये महा-योगिनि भूत-वेताल-भैरवादि-तनु-विधायिनि।।३।।

निःशुम्भ-शुम्भ-शिर-छेदिनि अखिल-सुख-दायिनि त्रिदश-राज्य-दायिनि सर्व-स्त्री-रत्न-रूपिणि दिवे देहे निर्गुणे सगुणे सदसद्-रूप-धारिणि सुर-वरदे सहस्रारे अयुताक्षरे सप्त-कोटि-चामुण्डा-रूपिणि नव-कोटि-कात्यायिनि अनेक-रूपे लक्षालक्ष-स्वरूपे।।४।।

इन्द्राणि ब्रह्माणि रुद्राणि ईशानि भीमे भ्रामरि नारसिंहि त्रयस्त्रिंशत्-कोटि-देवते अनन्त-कोटि-ब्रह्माण्ड-नायिके चतुर्दश-शत-लक्ष-मुनि-जन-संस्तुते सप्त-कोटि-मन्त्र-रूपे महा-काल-रात्रि-प्रकाशे कला-काष्ठादि-रूपिणि चतुर्दश-भुवनाभय-कारिणि गरुड-गर्भिणि।।५।।

कंक्रौं ह्रौं-कारा-श्रींकारा क्षौंकार-जूंकार-सौंकार-ऐंकार-ह्रां-ह्रींकार-ह्रौंकार-नाना-वीज-कूट-निर्मित-शरीरे सकल-सुन्दरि-गण-सेवित-चरणारविन्दे त्रिपुर-सुन्दरि कामेश-दयिते करुणा-रस-कल्लोलिनि कल्प-वृक्ष-वनान्तस्थे चिन्ता-मणि-मन्दिर-निवासे चापिनि खड्गिनि।।६।।

चक्रिणि गदिनि पद्मिनि नील-भैरवाराधिते समस्त-योगिनी-चक्र-परिवृते कालि कङ्कालि तारे तुतारे सुतारे ज्वालामुखि छिन्न-मस्तके भुवनेश्वरि त्रिपुरे त्रिलोक-जननि विष्णु-वक्षः स्थलान्तः-कारिणि अमिते अमराधिपे अनुपम चरिते गर्भ-भयादि-दुःखापहारिणि।।७।।

मुक्ति-क्षेत्राधिष्ठायिनि शिवे शान्ते कुमारिके देवी-सूक्त-दश-शताक्षरे चण्डि चामुण्डे महा-कालि महा-लक्ष्मि महा-सरस्वति त्रयी-विग्रहे प्रसीद प्रसीद, सर्व-मनोरथान् पूरय पूरय, सर्वारिष्ट-विघ्नान् छेदय छेदय, सर्व-ग्रह-पीड़ा-ज्वरोग्र-भयं विध्वंसय विध्वंसय।।८।।

सर्व-त्रिभुवन-जीव-जातं वशय-वशय, मोक्ष-मार्गं प्रदर्शय-प्रदर्शय, अज्ञान-मार्गं प्रणाशय-प्रणाशय, अज्ञान-तमं निरशय निरशय, धन-धान्यादि-वृद्धिं कुरु कुरु, सर्व-कल्याणिनि कल्पय-कल्पय, मां रक्ष रक्ष, सर्वापद्भ्यो निस्तारय-निस्ताय, मम वज्र-शरीरं साधय-साधय।।९।।

ऐं ह्रीं क्लीं चामुण्डायै विच्चे स्वाहा, नमस्ते नमस्ते नमस्ते स्वाहा।।१०००।।

पर-देव्या इदं सूक्तं, यः पठेत् प्रयततो नरः। सर्व-सिद्धिमवाप्नोति, सर्वत्र विजयी भवेत् ।।

❀ ❀ ❀